22-08-2020

संस्कृतसामान्यम् । उपशास्त्री-I

अनिवार्यपत्रम् । √सेव् (सेवा करना) धातुरूपाणि । आत्मनेपदी ।

लट् (वर्तमानकालः)

| पुरुष | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पु० → | सेवते | सेवेते | सेवन्ते |
| मध्यम पु० → | सेवसे | सेवेथे | सेवध्वे |
| उत्तम पु० → | सेवे | सेवावहे | सेवामहे |

लोट् (अनुज्ञा)

| | | | |
|---|---|---|---|
| प्र० पु० → | सेवताम् | सेवेताम् | सेवन्ताम् |
| म० पु० → | सेवस्व | सेवेथाम् | सेवध्वम् |
| उ० पु० → | सेवै | सेवावहै | सेवामहै |

लङ् (अनद्यतन भूतकाल)

| | | | |
|---|---|---|---|
| प्र० पु० → | असेवत | असेवेताम् | असेवन्त |
| म० पु० → | असेवथाः | असेवेथाम् | असेवध्वम् |
| उ० पु० → | असेवे | असेवावहि | असेवामहि |

विधिलिङ्गम् (इच्छा, कामना, चाहिए)

| | | | |
|---|---|---|---|
| प्र० पु० → | सेवेत | सेवेयाताम् | सेवेरन् |
| म० पु० → | सेवेथाः | सेवेयाथाम् | सेवेध्वम् |
| उ० पु० → | सेवेय | सेवेवहि | सेवेमहि । |

लृट् (भविष्यत् काल)

| | | | |
|---|---|---|---|
| प्र० पु० → | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| म० पु० → | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उ० पु० → | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

22-08-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्य:)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

22-08-2020

संस्कृतसामान्यम्। उपशास्त्री- II

अनिवार्यपत्रम्। √ चि (चुनना, एकत्र करना) धातुरूपाणि

लट् लकारः (वर्तमानकालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पु० → | चिनोति | चिनुतः | चिन्वन्ति |
| मध्यम पु० → | चिनोषि | चिनुथः | चिनुथ |
| उत्तम पु० → | चिनोमि | चिनुवः, चिन्वः | चिनुमः, चिन्मः |

लोट् (अनुज्ञा)

| | | | |
|---|---|---|---|
| पु० → | चिनोतु | चिनुताम् | चिन्वन्तु |
| पु० → | चिनु | चिनुतम् | चिनुत |
| पु० → | चिनुवानि | चिनुवाव | चिनुवाम |

लङ् (अनद्यतन भूत काल)

| | | | |
|---|---|---|---|
| पु० → | अचिनोत् | अचिनुताम् | अचिन्वन् |
| पु० → | अचिनोः | अचिनुतम् | अचिनुत |
| पु० → | अचिन्वम् | अचिनुव, अचिन्व | अचिनुम, अचिन्म |

विधिलिङ्गम् (ईप्सा, कामना, चाहिए)

| | | | |
|---|---|---|---|
| पु० → | चिनुयात् | चिनुयाताम् | चिनुयुः |
| पु० → | चिनुयाः | ,, | चिनुयात |
| पु० → | चिनुयाम् | चिनुयाव | चिनुयाम |

लृट् (भविष्यत् कालः)

| | | | |
|---|---|---|---|
| पु० → | चेष्यति | चेष्यतः | चेष्यन्ति |
| पु० → | चेष्यसि | चेष्यथः | चेष्यथ |
| पु० → | चेष्यामि | चेष्यावः | चेष्यामः |

22-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)।
रा० उ० सं० महावि० सुरखसेता, पूर्णियाँ।

22-08-2020

व्याकरणाचार्य: -
अनिवार्यपत्रम्।

शास्त्री II

रघुवंशम्। श्लोकव्याख्या।

"यस्मिन्महीं शासति वाणिनीनां निद्रां विहारार्धपथे गतानाम्।
वातोऽपि नास्रंसयदंशुकानि को लम्बयेदाहरणाय हस्तम्॥"

सन्दर्भ: → पूर्ववत्।

प्रसङ्ग: → अत्र कवि: राज्ञ: दिलीपस्य श्रेष्ठशासनतन्त्रं वर्णयति।

अन्वय: → यस्मिन् महीं शासति विहारार्धपथे निद्रां गतानां वाणिनीनाम् अंशुकानि वात: अपि न अस्रंसयत् आहरणाय हस्तं क: लम्बयेत्।

शब्दार्थ: व्याकरणञ्च → यस्मिन् = यत्र, दिलीपराजे, दिलीपे वा। मही = भूमिम्, राज्यम्। शासति = पालयति। विहारार्धपथे → विहारस्य अर्धपथे, तस्मिन् = क्रीडाभूमिमार्गे। निद्रां = शयनम्। गतानां = प्राप्तानां। वाणिनीनां = मत्तस्त्रीणाम्, नर्तकीनाम्। अंशुकानि = वस्त्राणि। वातोऽपि = वायुरपि। न अस्रंसयत् = नाकम्पयत्। आहरणाय = अपहारणाय। क: = पुरुष:। हस्तं = करं। लम्बयेत् = प्रसारयेत्। महीम् → मह्यते इति मही, तं = (भूमिम्)।

तात्पर्य: → सुनन्दा इन्दुमतीं प्रति कथयति यत् यस्य दिलीपस्य शासने विहारमार्गे मद्यं पीत्वा शयनशीलानां युवतीनां वस्त्राणि वायुरपि न प्रकम्पयति स्म, किं पुन: पुरुष: तानि अपहर्तुं हस्तं प्रसारयेत्। दिलीप: एष राजा अजस्य पूर्वज: आसीत् इति भाव:। अस्मिन् श्लोके शृङ्गार रस:, वैदर्भीरीति:, प्रसादगुण:, अनुप्रासालङ्कार:, उपजातिछन्दश्च।

[signature] 22-08-2020

डॉ० निर्मल कुमार झा, (अ० प्राचार्य:)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।